प्रवेश सं० १८१९६ विषयः पुराणेतिहासम् क्रम सं०

नाम पंचक्रोशीमाहात्म्यम् (ब्रह्मवैवर्त) ग्रन्थकार

पत्र सं० 2-26

श्लोक सं० — अक्षर सं० (पंक्तौ) २८ पंक्ति सं० (पृष्ठे) ९

आकार: १०" x ४.५" लिपिः दे. ना. आधारः का.

वि० विवरणम् अपू० 14498 सं. १८९३



ना. ३७९१

Indira Gandhi National Centre for the Arts

नैःस्तोत्रैकैःशुभैः ८ प्रसन्नंमांमुनिर्ज्ञात्वावचनंचेदमब्रवीत् । किंचिद्द्विजसु
कामोहंदेवदेवदयानिधे ९ आज्ञयाप्रवदाम्यद्यःसर्वज्ञस्यतवाग्रतः मयाचो
क्तोवदस्वेतित्वंमेभक्तःप्रियःशुचिः १० अदेयंनवनास्त्यद्यनिर्वाणमपिपाद्य
तां यस्तुमांसर्वभावेनभजतेकोपिमानवः ११ नतस्यादेयमस्तीहत्रैलोक्येस
चराचरे जैगीषव्यउवाच अयंममदुराचारःशिष्यःपापरतःसदा १२ का
श्यांवसन्नपिमदात्मस्याह्यसंनवेत्तियत् शिक्षितोबहुधास्माभिर्बहुधाताडि
तोपिहि १३ परदारपरद्रोहरतःपरधनापहृत् पिशुनःपापनिरतोवेश्यागृह
निवासकृत् १४ पितृमातृगुरुद्रोहीविप्रमित्रध्रुगेवच किंबहूक्तेनदेवेशपा
पंनिर्वचनंमया १५ नशक्यतेलज्जयास्यकर्तुंयद्ब्राह्मणोह्यसौ मयानिष्का

Indira Gandhi National
Centre for the Arts

पं.को.
२

स्तिः पापश्चाश्रमात्स्वात्ततो गतः १६ किंचित्किंचिच्चेष्टितं हि ज्ञात्वा श्रुत्वापि शिक्षि
तः न करोति यदा किंचित्सित्ववृत्तं निंदितस्त्वयं १७ तदा वाग्व्यवहारोऽपि सक्तः सर्वा
त्मना मया मत्संनिधौ विनयवान्स्वेच्छाचारो बहिः सदा १८ इति पौरमुखाच्छ्रु
त्वा चेष्टितं तस्य दुर्मतेः मत्संनिधानाद्गच्छ त्वं नो चेच्छप्स्यामि दुःकृत १९ मतः प
ठित्वा शास्त्राणि धर्मज्ञानमयानि च करोषि निंसंततकर्म येन लोकाः पराङ्मुखाः
२० वहुधा सर्वलोकेभ्यः श्रुत्वा दुर्विनयं तव सक्तो मया पापयेच्छ त्वं गच्छ वर्त्तितुं वाधुना
२१ इत्युक्तः समया शिष्यो लज्जितः पापकृत्तमः गंतुं मतिस्त्वोढतवान्विहाय त्वत्र
काशिकाम् २२ काशीं परित्यज्य गतो नातिदूरं विंध्याद्रिकूटं समवाप्य चापि तपश्च
चाराशुचिविशुद्धिकारणं वर्षत्रयं यत्र तत्वणादिभुक्परम् २३ तत्काद्रिकूटं च तत

राम.
२.

प्रकाशे गोदावरी भीमरथ्यौ ततोऽपि तत्रापि तस्थावशुचिरं धनवलो न शर्म लेभे सुदूरं ते
कसाधाम् २४ ततः श्रीशैलमागमत् दृष्ट्वा स्वामिनमव्ययं स्थितमग्रे विभुं स्कंदं
ददर्श तत्र वालजं २५ तत्रैव वसतिं चक्रे तपः शुद्धं चकार च काश्यां कृतानां पा
पानां शुद्धये धर्मवृद्धये २६ एवं वहुतिथे काले ह्यगस्त्यः कुंभसंभवः काशीवि
रहदुःखेन विह्वलः समुपागतः २७ हा काशि काशि हा काशि काशिके काशिके
ति च वहुधा व्याकुलो भूत्वा पठन्स्कंदमुपागतः २८ वारं वारं श्रवणतः काशि
नामामृतस्पृहि तेन दृष्टः काशिवासी ह्यगस्त्यः स्कंद एव च २९ नानातपोभिर
मुष्मैर्नमया स्कंद ईक्षितः काशीनामानलेनाशु दग्धपापो हि दृष्टवान् ३० इति म
त्तवान्पूर्वं पुनः पृष्टो मया त्वयं पुनरूचे तयोः शुद्धं संवादं काशि संमतं ३१ श्रा

॥पं॰को॰४ ३

अस्थिकेशनखामांसंयदिकाश्यांपतेदिह महापा[illegible]पास्तादास्वर्गयांतिसाहसम् कांशीसमासाद्य मुक्ताःस्युःसर्वज्ञंतव ॥ नदंतिकाशीमरणमंतिकाशीग च्छंतिकां रजोजपस्नानपरिक्रमस्तुतिकर्मेनरायांतिपरंसदाशिवं ॥    यत्र

स्यमागतंज्ञात्वास्कंदःप्रीतमनाभवत् ॥ अगस्त्यउवाच ॥ शीघ्रंमांपरिखंजमहामुने

३२ काशिकाविरहात्त्वांतुजानेव्याकुलमानसं ॥ ज्ञानिनामपिधीराणांयोगिनां

सुतपस्विनां ३३ काशिविरहजंदुःखंबाधतेविदुषांसदा ॥ ज्ञानानांदेहगेहादि

प्रीतियुक्तमनोधियां ३४ अन्यप्रदेशवत्काशीभातिनिसंदुरात्मनां ॥ त्वंकाशि

वासतत्वज्ञःशंकरार्चनतत्ववित् ३५ देवैःस्वकार्यनिरतैःकर्मरूपैर्विवासि

तः ॥ काशीपश्यतियःकश्चित्काश्यांवसतिपश्चहि ३६ काशीस्मरतियःक

श्चित्सपूज्योममसर्वदा ३७ इत्युक्त्वापूजितस्तेनस्वामिनामुनिसत्तमः ३८ दत्वा

चासनपाद्यादिसर्वंपप्रच्छकुंभजं ॥ स्कंदउवाच ॥ वदस्वागस्त्यमुद्रात्मन्कंकामं

करवामते ॥ ३९ नचास्मद्दर्शनंप्राप्यशोचितुंत्वमिहार्हसि ॥ अगस्त्यउवाच ॥ ज

केचित्स्नात्वाकेपिसंदर्शनेनकेचिद्दुत्वास्नानमात्रेणकेचित्केचिद्देवंदर्शनेन
यकेचित्पूजांकृत्वाकेपिमुक्ताबभूवुः ॥ १

ग॰
३

यदेवमहादेवतनयानंददायक ॥ ४० ॥ वाराणसीप्रापयस्वयदितुष्टोसिषण्मुख

स्कंदउवाच ॥ त्वंप्राप्स्यसिमहाबुद्धेविघ्नांतेकाशिकांशुभां ॥ ४१ तवापिकर्मगहनं

काशीसत्काश्रितिष्यसि ॥ नज्ञायतेसूक्ष्मतरंहिकिंचित्कर्माखिलोकस्यहिदुर्विभा

व्यं ४१ योगादियज्ञादितपोभिरुग्रैर्युक्तस्यतेसंप्रतिनास्तिकाशी ॥ नज्ञायतेक

स्यकिमस्तिपुण्यंपश्चात्सोपिकाश्यांतनुभृत्सदास्ते ॥ ४२ देवादयोपिप्रभवंतिनैव

स्थानुत्तमंकाशीकायांकुगर्वाः ॥ विश्वेशविश्वेशशरण्यशंभोनाम्नागतिस्त्व

सदाज्ञविहाय ॥ ४३ ॥ अनेकतापार्दितमानसानामस्माकमाकांक्षितदानदक्ष

त्वयांकृतेयंजनतापशांतयेप्रायाः ॥ मतंप्रापयितुंजनानाम् ॥ ४४ ॥ नजातिशी    योसत अजप्रपातापयि

लंसुकृतंवापि    ज्ञानीमतंयच्छतिशंकरःश्रुतौ ॥ पुराणशास्त्रश्रुतिधर्मशा

त    ॥ अमृतंमोदं    श्रुतौकरै

काशी

MISSING PAGE 1

Indira Gandhi National
Centre for the Arts

पं॰को॰ ४

त्वविष्टिर्न्नभिर्गदितंदीनसाधो॥४५॥ आशामात्रंसाधनंनः कृपालोनोवाधर्मःसांख्य
पुक्तंतपोवा॥ दीनानहंकारविकारहीनान्प्रियोसिकाशीपतिराद्दृतात्मा॥४६॥ दीना
नाथैकशरणंक्षेत्रक्षेत्रज्ञसंयुतंप्राप्यतेनिरहंकारैराशाशतविवर्जितैः॥४७॥ अ
गस्त्यउवाच॥ प्रमादाद्यदिसूक्ष्मंवास्थूलंवापातकंनरैः कृतंकाश्यांतात्कारेक
थंतस्यास्तुनिष्कृतिः॥४८॥ स्कंदउवाच॥ अविमुक्तेकृतानांहिपापानांकुंभैव न
दृष्टानश्रुतावापिमयाशिवमुखादपि॥४९॥ निष्कृतिःस्थूलसूक्ष्माणांशिवोवेत्ति
नचापरः॥५०॥ जैगीषव्यउवाच इतिस्कंदमुखाच्छ्रुत्वाजातत्रासस्त्वयंपुनः॥सह
सामामुपागत्यप्रार्थयामासशंकरम्॥ मयापिनश्रुतादृष्टाक्षेत्रपापकृतानृणाम्॥५१॥
निष्कृतिःशार्वसर्वज्ञब्रूहिचेदस्तिशंकर॥ श्रीभगवानुवाच॥ जैगीषव्यमुनेत्वंमेभ

पं॰म
सिधा ३
राम
॥४॥

क्तःपरमतापसः॥५२॥ श्रुतिस्मृतिपुराणज्ञःकाशीतत्त्वविदांवरः॥ तवाग्रेकथयि
ष्यामिकाशीमाहात्म्यमुत्तमम्॥५३॥ प्रायश्चित्तंनास्तिकिंचित्क्षेत्रपापकृतांनृणां
अस्तिचेदेकंसुगोप्यंहित्वदग्रेकथयामितत्॥५४॥ प्रायश्चित्तंनकर्मास्तिमुनेज्ञानं
विनाक्वचित्॥ ज्ञानंहिदुर्लभंनृणांविषयासक्तचेतसां॥५५॥ तत्ज्ञानंकाशिका
यांतुसाक्षाद्भवतिदेहिनां॥ देहाभिमानिनांसोख्यंस्वपीणामपिदुर्लभम्॥५६॥
अज्ञानंदवनेज्ञानमाच्छादयदुर्मतिः॥ स्वल्पेनाप्यघातेज्ञानंअंगुल्यास्तूर्यव
त्खलु॥५७॥ तस्मात्त्वमेवयोधीरःसभवेत्ज्ञानभाजनं॥ नजितेंद्रियतालोकेन
वैराग्यंवृषोपिन॥५८॥ विविक्तसेवासत्संगःश्रवणाद्यपिदुर्लभं॥ अन्यान्यपि
मुमुक्षूणांसाधनानिमहांतिच॥५९॥ भवंतिविविधदृषेननात्रात्रादृतात्मनां॥भ

विषयारो

॰यसीस्कन्दे
वसेत्सदा॥

Indira Gandhi National Centre for the Arts

॥पं॰क्रो॰॥
१५

वंतिकाश्यांसफलानितानिमोक्षावसानानिसुसाधनानि॥ सदासदानंदमयेमनाल
येमयासहायेनसुराधितानि॥ काश्यांस्थितानांजंतूनामविचारितकर्मणां॥६१॥न
सुखंनपरांशांतिस्तस्मात्काश्यांविचारकृत॥ सुखमाप्नोतिपरमंपरांशांतिंप्रयांति
हि प्रायश्चित्तविहीनानांनशांतिःकुत्रचिद्भवेत्॥६२॥ किंपुनःकाशिकांमध्येपा
पंकृत्वासुखंलभेत्॥ ब्रह्महत्यादिपापानांप्रायश्चित्तंहिकाशिका॥६३॥ काशिका
यांकृतेपापेप्रायश्चित्तंनजायते॥ प्रायश्चित्तविहीनानांयातनावहुदुःखदा
६४ ज्ञानस्वरूपाकाशीयंपंचक्रोशपरीमिता॥ तस्याःप्रदक्षिणंकृत्वानरःपा
पैःप्रमुच्यते॥६५॥ ममब्रह्ममयंलिंगमायातालात्समुत्थितं॥ शिवलोकोपरि श्रीराम
गतमस्मात्प्रदर्शागुलं॥६६॥ आजन्मसंचितैःपापैःमुच्यतेतत्प्रदक्षिणात्कृत्वे ५

शिवलोकोपरिदशांगुलं एतेनपरिमाणंनास्ति१

नेकृतानांपापानांप्रायश्चित्तंनचेतरत्॥६७॥ प्रदक्षिणंद्वयंकृत्वादशजन्मकृतात्
घात् मुक्तोभवतिपापात्मासद्योमोक्षमवाप्नुयात्॥६८॥ शुभंकृत्वायदिकुर्याद्धिमोहा
त्पापंनतस्यतत्वात्रिप्रदक्षिणीकृतसभवेत्पापोहिविज्वरः॥६९॥ प्रदक्षिणात्रयंकृ
त्वापापंजन्मशतार्जितं॥ विलयंप्रापयतिचनात्रकार्याविचारणा॥७०॥ यावज्जी
कु॰४ वंवशेत्काश्यांप्रत्यब्दंसुप्रदक्षिणं॥ कुर्यादेवनिरालस्योह्यानंदसदनस्यहि॥७१॥ प्र
सन्नेयेप्रैवंतिपंचक्रोशप्रदक्षिणं॥ जीवन्मुक्तास्तेज्ञेयानिष्पापाःकाशिवासिनः
७२ इतिश्रीब्रह्मवैवर्त्तेप्रायश्चित्तनिर्णयेपंचक्रोशमाहात्म्येप्रथमोध्यायः॥१॥
श्रीमहादेवउवाच॥ अत्रैवोदाहरंतीममितिहासंपुरातनं॥ ऋषिःकूष्मांडतनयो
मंडपःसगदोषतः॥१॥ बालएवसमत्तेत्रपापंचरतिवेदवित्तापि॥ ज्ञानिवारितोमात्रा

Indira Gandhi National Centre for the Arts

अस्तकदिरादं शौउलब्न:

॥पं॰ चे॰॥ भ्राजोश्रोत्रियवंशजः॥२॥असत्संगंत्यजन्तिनोविषयाशक्तमानसः॥अस्ताद्रपरद्रोहपरउ
६ परतः सदा॥३॥परापवादकुशलोवेदवादविवर्जितः॥यथायथावयस्तस्यवृद्धिंप्राप
दुर्मतेः॥४॥तथातथापापरतःसत्संगविमुखःसदा॥मित्रैर्द्वित्रैःपवित्रैर्नसंवृतोराज नरपते
वेश्मनि॥५॥प्रविष्टोधनमादायचौर्येणसविनिर्गतः॥वेश्यागृहेतन्निक्षिप्यतयास
हदिवानिशं॥६॥रमतेतमंउपोविप्रःसदाविप्रत्वनाशकः॥कदाचिद्रममाणोसौतृषा
र्तःसमपद्यत॥७॥मंचाधस्तात्ताम्रपात्रंगृहीत्वार्पितवान्सुरां॥जलबुद्ध्यापातकंतज्ज्ञा
तंतद्विचारतः॥८॥किमेतद्धिमयापीतमितिवेश्यांसपृष्टवान्॥तमाहसामयानी
तंसुरापात्रंसुसौख्यहेतवे॥९॥त्वदर्थेसंभृतंमद्यंपुनःपिबसहेतसद्धेत इतिवेश्याव ॥द॰ श्री॥
चःश्रुत्वाधिग्धिक्पापंमयाकृतं॥१०॥वेश्यासंगेनमदिरापीताब्राह्मणसूनुनामंद ॥६॥

पश्यतोमित्रंदृष्टंमोहात्सुदुःखितः॥११॥वेश्यामुखात्सुरापानंतस्यश्रुत्वाजगर्हतुः॥भ्रातो
विप्रस्ततोस्माकंसंगीवेश्यारतस्ततः॥१२॥सुरापानंततोजातंअतस्त्वंकिंकरिष्यसि॥अ
ख्याद्यावःपापंतेसुवर्णंदेहिनोवद॥१३॥अतएवमुक्त्वापुनर्वेश्यागारंगत्वाद्विजःसुव
र्णंयाचयामासताडयामासतंचसा॥१४॥वेश्योवाच॥वराकममलीलायाःस्वादंज्ञा बत्कं चौरत्वं
त्वापिमूर्खवत्॥सुवर्णंयाचसेकिंत्वंलज्जामात्रंकियन्मम॥१५॥चुंबनेचुंबनेलब्धंबहु
रूपःप्रीतितोमया॥त्वंमयोपेक्षितोदीनोदत्वाप्रार्थयसेधनं॥१६॥कामशास्त्रंत्वयामू
७ र्खपठितंनकदाचन॥इतिलीलांनजानासिममकंदर्पमोहिनीं॥१७॥गच्छगच्छसुखेना
शुयावद्दासानसंतिमे॥ताडयिष्यंतिसर्वास्त्वांमित्रैर्द्विजंब्राह्मणाधमं॥१८॥वेश्यागृहात्त
तस्तूर्णंक्षुधितोपिपिपासितः॥पितुःसकाशमगमन्मातुश्चप्रियकाम्यया॥१९॥ततस्तौ

Indira Gandhi National Centre for the Arts

॥पं॰को॥ ॥८०॥

दारकौ पाप्तौ मित्रत्वे परिकल्पितौ। वदंतौ देहि कनकमस्मदंशं त्वमाशु नः॥ २१॥ राज्ञो
गृहाद्यदानीतं स्तेयेनास्माभिर्हृतं मंदुत्ति श्रुत्वा पिता तस्य महादुःखसमन्वितः॥ २२॥
कृष्ण उवाच। उवाच दारकौ भीतः कौ युवां केन कर्मणा। कौ भवंतौ कथं संग
तौ तो येन दुरात्मना॥ २३॥ तद्विरूपं च कुत्रास्ति यदर्थं वां व्यवस्थितौ। दारकौ ऊचतुः कुवां ४
अहं कुविंदस्त्वत्सुतो मंदपो नापितस्त्वयं॥ २३ मैत्री त्रयाणां संभूता देवादोषत्र
यात्मिका। विभज्य भागान्सर्वैर्हि ग्राह्या इति विधिः कृतः॥ २४ अनेन वेश्याभवने
निक्षिप्तं सर्वमेव हि। सा न प्रयच्छति मुने वेश्या वादविवादिनी॥ २५॥ अतः परं
जगृहाम्येतेवक्तुमेव हि। देहि दापय चास्माकं धनं शीघ्रं सुदुःखदं॥ २६॥ नो चेत्त ॥राम॥
वात्मजः साधो अल्पायुर्भविष्यति॥ २७ तं पुत्रं तथास्मान स्वात्मानमपि चान ८०

ष॰प्र॰सं
घ॥ २७॥ कृष्ण उवाच॥ आगच्छ त्वं मया सार्द्धं राजराजस्य सन्निधौ। पुत्रं नीत्वा गमिष्या
मि शास्त्यर्थं धर्मज्ञो यथा॥ २८॥ राजभिः कृतदंडास्तु शुध्यंति मलिना नराः॥ अनिर्वे
यकृतः पापा गच्छंति नरकं नराः॥ २९॥ तावूचतुः पुत्रं समर्पय मुने किमर्थं त्वं गमि
ष्यसि। राज्ञोग्रेहं विवादार्थं नागंतव्यं कदाचन॥ ३०॥ कृष्ण उवाच। त्वया सह न सं
बंधः सुतान्नीयतां सुतः। नो चेदहं गमिष्यामि राजवेश्म सुनिश्चितं॥ ३१॥ तावूच
तुः त्वया सह न संबंधो देहि मित्रसुतं शठ अस्माभिरेव कर्तव्यं त्वं जेष्यसि चेत्कलि
तः॥ ३२॥ कृष्ण उवाच। पुत्र गच्छ द्विजश्रेष्ठ द्विजकृतं त्वया कृतं प्रायश्चित्तं विधाय
मुराज्ञा दत्तेन चान्यथा॥ ३३॥ आगंतव्यं त्वया वत्स याहि नो चेद्यथासुखं। तावल्ला
हं तव पित्तानसुतस्त्वममायवान्॥ ३४॥ श्रीमहादेव उवाच। जैगीषव्य मुनिश्रेष्ठ ते

Indira Gandhi National Centre for the Arts

।।वे-मा।। नविप्रेणमंडपः समर्पितस्तयोः पुत्रस्नेहमुत्सृज्य दूरतः ३५ धार्मिकाणां धनैः पुत्रैः
।।५।। कलत्रैर्न प्रयोजनं धर्मसंग्रहशीलाश्च यतस्ते काशिसंश्रयाः ३६ पुत्रो भ्राता पिता
वापियः कश्चित्पापमाचरेत् सोज्यएव सपापात्मा भवेत्संसर्गजं भयं ३७ तं नी
त्वा दूरदेशं तेताडयामासतुः क्रमात् सताड्यमानो मूर्छां तु प्रायमत्सु समां मुने
३८ मत्वो यमिति चोत्सृज्य ययतुस्तौ विषमवत् पश्चात्तापेन संतप्तो अविमुक्ते
गमसन्निधौ ३९ सत्कावि पसुतं भ्रान्तो गतोसिद्धेश्वरालयं तत्रोषित्वा तु तां
रात्रिं दुःखितो क्षुधितो भृशं ४० पश्चात्तापपरीतो तु पुनरन्वेषितुं गतो मत्तो
वाजीवति तु वा त्यक्त्वा देशं सजामहे ४१ यावद्विचारणपरो वागतावत्सिसंग
मे तावद्विजसुतो भ्रान्तो गतम्स्र्छः प्रतस्थिवान् ४२ पंचक्रोशात्मकस्यैवाशि ।।राम।।
।।५।।

वलिंगस्य तद्दिने प्रदक्षिणं प्रकुर्वन्ति शिवमाहात्म्यवेदिनः ४३ क्षेत्रप्रदक्षिणं तत्
संगेन चलितः स च तस्मिन्दिने कर्दमेशसन्निधौ यात्रिणः स्थिताः ४४ सोपि तत्र स्थि
तो विप्रो मंडपो मंडपो भवत् रात्रौ जागरणं तेन कृतं तत्संपिशावाग्रतः ४५ सर्वैः प्रोत्सा
लि हितः साधुसाधु साध्वीं साध्विति अयं परमशैवस्य कुंभाउस्यतु मंडपः ४६ पुत्रशि
वव्रतधरः साधु नृत्यति गायति न तस्य चेष्टितं कोपि तन्मध्ये वेत्ति तत्त्वतः ४७ अत
एवादृतः सद्भिर्भक्तिं दृष्ट्वा बहिर्गतां सोपि चारु विचित्रांगः सर्वेषां सुमनोहरः ४८ च
बभूव सद्भक्तिपरः सत्संगेन द्विजोत्तमः विचार्य मनसि ह्येवं शिवभक्ता सतां प्रियः ४
९ जातोस्मि दुष्टोपि सदा पंचपातकसंयुतः साधुवादः सतां ह्येष भवति प्रत्यहं मम
५० धनधान्यादिलब्धिश्च भोजनाच्छादनानि च अनायासेन लभ्यन्ते कुमार्गेणा

Indira Gandhi National
Centre for the Arts

पं॰को॰
६

सदा॥५१॥ शिवेभक्तिः सतां तुष्टिर्द्देह पुष्टिर्निराकुला। येन मार्गेण भवन्ति सन्मार्गाः सर्वसम्म
तः॥५२॥ एवं विचारयन्सोथ चंडिकाप्राप मंडपः। तत्र पूजां भीमचंद्राः कृत्वा काशिनिवा
सिभिः॥५३॥ ब्राह्मणैर्भोजितः सम्यग्गादृसः शिवभक्तितः। उपविष्टास्ततो रात्रौ देव्याः रत
श्रादृताः॥५४॥ क्षेत्रमाहात्म्यकथनश्रवणं चक्रुरुत्सुकाः। ततो विप्रजनाः शैवाः की
र्तनं चक्रुरादृताः॥५५॥ तन्मध्ये मंडपः शैवो नृत्यं गानं चकार ह। साधुवादेन महता पु
नस्तैः साधुसत्कृतः॥५६॥ तस्यापि च मनो वृत्तं शिवे हि च निमज्जत। अथ ततो
यदिवसे मार्गे एव समंडपः॥५७॥ न संगच्छन्ति गायन्ति स्वयमेव शिवं शिवं पदे पदे दक्षिण
तः क्षेत्रस्य मम सद्द्विजः॥५८॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं भवेद्यथा। महादेव मह
देव वासुदेव शिवेति च॥५९॥ स्मरन्न सन्नभीत्यांसः सर्वपापवहिष्कृतः। ततो येदि

पु १

॥राम॥
॥६॥

वसेणत्वात देहलीविनायकं॥६०॥ जयामासुख्यया काशीभक्तिविवृद्धये। मंडपो लोलुपर
हितः शिवनामपरायणः॥६१॥ बलात्कृतमपि त्यक्त्वा हरिकीर्तनतत्परः। स्नात्वा तेन प्रविसं
भोनकस्यापि वशे स्थितः॥६२॥ निर्द्वंद्वः समदृक् शान्तो वभूवागतसाध्वसः। ब्राह्मणेन म
यास्ते न्यस्तसुवर्णस्य हृतं रहः॥६३॥ वंचितः स पिता मान्यो माता साध्वी च वंचिता। पापे
नोपार्जितं द्रव्यं वेश्यावेश्मनि तिष्ठति॥६४॥ मनसा विग्रहं नंगमनं मातुरेव च। संपन्नं
च सुरापानं सत्वाद्भूत्वा गृहे हृतं॥६५॥ आहारो मैथुनं निद्रा मिथ्यावादादयोऽपि हि। जान
ममवरा कस्य कथं पापपरिक्षयः॥६६॥ अनुतापैः सुसंतप्तो मंडपो मंडवर्जितः। क्षेत्रं प्रद
क्षिणीकुर्वन्निष्पापः समपद्यत॥६७॥ कचिद्रात्रिसंस्थ सतस्य सत्वा यसंचयं। कचि
दूसति क्षेत्रस्य प्रदक्षिणकृतिं तदा॥६८॥ काशि काशीति काशीति शिव शंकर केशव।

Indira Gandhi National
Centre for the Arts

॥पं॰ क्रो॥
॥१०॥

पाहि मां पतितं दीनं गुरुदेवापराधिनं ॥६९॥ रामेश्वरं समागम्य स्नात्वा संतर्प्य देवताः ॥ रामेश्वरं
समभ्यर्च्य सोमनाथं तथार्च्य च ॥७०॥ रामं राजीवपत्राक्षं सीतालक्ष्मणसंयुतं न भुंक्ते न
पिबत्यंभो न सगो नाद्रित सरः ॥७१॥ प्रार्थ्यमानोपि गृह्णाति न किंचिद्रूपिवेदहत्वा ततः
प्रचलिताः सर्वे यात्रिणः शिवतत्पराः ॥७२॥ मंडपोपि स्मरन्काशीं शिवं विसुव्रतः स्थि
वान् वृषभध्वजसमागमस्नात्वा वैकापिलह्रदे ॥७३॥ देवं संपूज्य विधिवत्स्थित्वा
तत्र च पूर्ववत् ॥ ततः प्रभाते वरुणासंगमे स्नानमाप्य च ॥७४॥ गताः सर्वे विश्वना
थं दृष्टुं श्रीपार्वतीपतिं ॥ तत्र स्थित्वा महापूजां कृत्वा सर्वे महाजनाः ॥७५॥ प्रन्ना
निवासो दानानि दद्युः शंकरतुष्टये ॥ मंडपोपि तथा कृत्वा मोक्षमंडपमध्यतः ॥७६॥ घ
टाष्टांगप्रणतः प्राह सस्त्रदृष्ट्या घटकृतः ॥ मया पापानि सर्वाणि सुमहांति बहून्य ॥राम॥ ॥१०॥

पि ॥७७॥ कृतानि तत्र वद त्वं निष्कृतिं मम सत्तमाः ॥ यथाहं पापनिर्मुक्तो भवामि तद्दुच्यतां
॥७८॥ सदस्या ऊचुः ॥ त्वं निष्पापोसि भक्तोसि शिवयोः केशवस्य च ॥ पंचक्रोशात्मकं लिंग
सत्संगाद्दक्षिणीकृतं ॥७९॥ यमेत्रा वाणिज्यमूलाद्यैः किं पुनः श्रवणादिभिः ॥ येन केना
पि सुमहत्तस्य पापं न विद्यते ॥८०॥ मंडप उवाच ॥ पित्रा निष्काशितः सोहं कथं यास्या
मि तद्गृहं ॥ पतामि कारणं किंचिद्दृष्टि चेद्गमनं गृहे ॥८१॥ प्रेषयंतु तदा सभ्याः शास्त्रप्रसय
संयुताः ॥ गर्हयंति गृहस्था नो नो चेत्किं गमनेन मे ॥८२॥ सदस्या ऊचुः ॥ आकारयस्व पितर
मस्मद्वचनगौरवात् ॥ प्रतीतिं दर्शयामो यद्दंडनाथस्य सन्निधौ ॥८३॥ श्रीमहादेव उवा
मंडपोथ गृहद्वारं गत्वा शिव शिवेति च ॥ महादेव महादेवेत्युत्कात् संव्यवस्थितः ॥८४॥ ध
कूष्मांडः प्राह दयितां कोतिथिर्द्वारि वर्तते ॥ पश्य पश्यार्य सुभगे शिव वाक् शंकरप्रियः

Indira Gandhi National Centre for the Arts

सं॰ को॥ ॥२२॥

८१ सा भर्तुर्वचनाद्गत्वा द्रष्टुमंडपमात्मजं। उवाच वचनं माता भर्तुः पुत्रार्थमादृता। ८२
आगते चैव च निर्वेशं कथमागमनं वद। मंडप उवाच। आहूयं ततिसदृस्याःस्वो पितरं च
ममानघ। ८३ निर्वेश वार्त्ता वहूला ततवद्गुणपुरग्रतः जननीमंडपस्याथ गत्वा कृष्मांड
मब्रवीत्। ८४ पुत्रस्ते कृतनिर्वेशः शिवस्मरणतत्परः। ह्यातितिथ नितिसद्वेशो नातिथिः
कश्चनेतरः। ८५ कृतनिर्वेशमनघं श्रुत्वा पुत्रं च स द्विजः। उत्थायागस्स सहसा ददर्श
शिवरूपिणं। ८६ रुद्राक्षमालिनं शांतं विभूतिकृतभूषणं उवाच किं समायातः शा
धं पुत्र यथा महान्। ८७ नहि स्वल्पेन धर्मेण प्रायश्चित्तं महत्स्मृतं। मंडप उवाच।
मया वहूनि पापानि कृतानि विविधानि च। ८८ न ज्ञायते त्वया पित्रा किमन्यैर्दूरसं राम॥
स्थितैः वलात्वा मान्यं ये वसदृस्याः शुद्धिदर्शिनः। ८९ अपरो च न ते कुरु तया त्वं मत्स्नेहेन ॥२२॥

मा वृजा त्वतिशुत्वा मंडपस्य वचः पत्न्यासमन्वितः। ९० धमुक्तिमंडपिकां प्राप सदृस्यैः संस्थि
तां शुभां तैराहूतो द्विजवरैर्धर्माधर्मविचारकैः। ९१ धर्मउपवेश्य तमूचुस्ते पुत्रस्ते शुद्धिमाप्नु
यात्। कृष्मांड उवाच। प्रायश्चित्तेन केनासौ शुद्धिं प्राप्नो मम आत्मजः। ९२ प्रवर्तातिर्मम
वाक्यादेनेन सह भुज्यते। सदृस्या ऊचुः। मुक्तिमंडपिकायास्तु स्वामी विष्णुर्न चापरः
९३ स चेद्ददाति वेदात्मा तदा शंका न चोत्तरं। तस्मार्षदाभानुमुखात्वा दीप्यन्ति च सत्त
मः। ९४ चोतदा मन्यस्व सुधीतः शास्त्रवेदप्रसादतः। इत्युक्त्वा ते सदृस्यास्ते तुष्टुवुर्विष्णु
मव्ययं। ९५ धरविंटडिंदंडपाणिं भैरवं चैव पंचमं। पंचापि तत्र सुधीता मुक्तिमंडपम
ध्यतः। १०० प्रादुर्भूता महात्मानो लोकप्रसुपकारकाः। विष्णुरुवाच। अयं शुद्धो म
हापापा मंडपः साधुसंग तः। १०१ तेत्र परदक्षिणं कृत्वा कीर्तिपित्वा जगद्गुरुं महाप्र

Indira Gandhi National
Centre for the Arts

काश्यां पापं ये प्रकुर्वंति पापात्तेषां दुःखं जायते निश्चयेन । शंभोर्लिंगास्तच्छिद्रा काशारूपं पंचक्रोशं तमतिक्रम्य मृदुः ।१०४।।

।। पं॰ क्रो॰ ।। १२। श्रवणं जातं तेत्रस्याशुभनाशनं ।१०२ तस्माद्यं गच्छ तु स्वगृहं पितृसमन्वितः ।दंडि कालभैरववध
रुवाच। काशीति नाम जपतां शिवनाम तुल्यं विघ्नादिपापनिचयो विलयं प्रयाति
किं तत्कथाश्रवणकीर्त्तनवासदानैः सम्यक्प्रदक्षिणवतामशुभस्य नाशः ।१०३
दंडपाणिरुवाच । कार्यं ममैतत्खलु यापि नांसदा करोमि दंडं बहुधावश्यमेवा प्रद
क्षिणीकृत्य समागतस्त्वयं काशीं विमुक्त्वा न विचार्यमस्ति तत् ।१०५। एवं तु सर्वे
वक्ष्यामि काशी माहात्म्यमद्भुतं न चात्र विस्मयः कार्यः काशीप्रतिकृतस्य च ना ।१०६
आसीत्त्रेतायुगे विप्रः शांडिल्यः समदर्शनः ज्ञानविज्ञानसंपन्नो विनष्टाशेषसं
शयः १०७ तस्याभवद्विशालाक्षी नाम्ना चैवातिसुंदरी । पित्रादत्ता सुमंताय वि ।राम ।।
धिना वह्निसन्निधौ ।१०८ अवंतीवासिने साहि पितृगेहे स्थिताभवत् संप्राप्ता ।१२।

ढुंढिराजः प्रियः पुत्रो भवान्याः शंकरस्य च ॥ तस्य पूजनमात्रेण त्रयोपि वरदाः सदा १
वैकालराजं कलिकालभीमं वाराणसी पुण्यपतीतो वटकोज्यमतैः ॥ भजंति काश्यां म पवं
मिहेतोस्त येव काश्याम पवर्ग भाजः ॥२॥

यौवनं कालेनायातस्तत्पतिः पुनः ।१०९ पुंश्चलीसंगदोषेण जाता सा स्वैरिणी प
रा । काश्यां चकार बहुधा यायं ताः रूपमाश्रिता ।११० एकत्रिदिने तथा सर्वे युवानस्तु
वशीकृताः निर्धनाश्च कृताः सर्वे रूपसौभाग्यसंपदा ।१११ देशांतरगताश्चान्ये त
द्गुणाकृष्टचेतसः ः एवं सा पापनिरता चक्रे पापमहर्निशं ।११२ मार्गशीर्षे कदाप्य
सौ यात्रा काश्यां द्विजोत्तमाः । पंचक्रोशाश्रिता पुण्या रुरिताणीव तारिणी यात्रितो
वी स्वसा हृष्टा हरिष्यामि धनं बहु ।११३ तेन संव्याजेन गानेन सर्वेषां काशिवासि
नां तु तिनिश्चिस्य सा पापा गता तैः काशिवासिभिः ।११४ दुर्गाकुंडे स्थिताः सर्वे या
त्रिणस्तद्दिने स्थिताः सापि तत्र विशालाक्षी चक्रे वासं शुभोदयं ।११५ रात्रौ जागर
णं चक्रे धनलोभेन नर्त्तनं ननर्त्त सा विशेषेण जगौ चातिमनोहरं ।११६ अकृता

Indira Gandhi National
Centre for the Arts

अस्त्रेऽश्वाः कौतुकं तु पश्यया वीतिसर्वदा ॥ गृहीत्वा नारके देहं सदा ? दात्यं त्वं वपुः १
येकेन जन्मनाकाश्यां निर्वाणं समवाप्यते ॥ अतः परं कः स्वर्गमपाय: सा ध्येनैर्विना २
काशीस्थ जंतुजातस्य सेवके: शिव सेवकः ॥ काशीवासि विरोधेन विरोध्यो हि भवे

शि०पं-को०२ विमनसः सर्वे तपागनाञ्चनर्त्तनात् संप्राप्तं च धनं भूरि तया यात्रार्थिनां नरणां ॥११७॥ ए भवेऽस्मिन् भवे सं

१२ वं द्वितीये दिवसे कर्द्दमेश्वरसंनिधौ तत्ताये भामचं ग्रां च चक्रे वासं शुभोदयं ॥११८॥ सारे भवे शिवे

चतुर्थे देहलीशे च चक्रे सा वरवर्णिनी रामेश्वरे पंचमे च स्नात्वा सा वरुणाजले ॥११९॥ विरोध्यो भवति

शुश्राव सा वाच्यमानं पुराणं देवसन्निधौ काशीमहात्म्यसंयुक्तं श्रुण्वन्ती सर्वपात्रि

णां ॥१२०॥ कृष्णीकृतानां पापानां यातनां भैरवीं परां श्रुत्वं सा भागधेयेन पश्चात्ता

पो महानभूत् ॥१२१॥ गर्हयामास चात्मानं मूर्छिता पतिता भुवि कष्टाद्द्वैर्यं समालंब्य

ती वै वैराग्यमागता ॥१२२॥ दृष्ट्वै तद्वसु विप्रेभ्यः सर्वाण्याभरणानि च पुनर्नैवं करिष्या

मीत्येवं संजल्पि निश्चया ॥१२३॥ अपृच्छ विनयोपेता ब्राह्मणान्सुमहायशान् विशाला राम

क्ष्युवाच ब्रूत विप्राः सुमेधा यानिष्कृतिर्यदि विद्यते ॥१२४॥ मादृश्या पापशीलाया: ॥१२॥

काशीस्थ लोकोन यमाद्बिभेति न दुःखसंघात्न च गर्भवासात् ॥ बिभेति चैकान्महतो
भयात्परं यस्मात् पुनर्जन्म शिवेन हीनम् १ सिवात धन विना तद्देवे भयं ॥
सर्वे ती र्थावगाहाच्च यत्फलं स्यान्नराणामिह तत्फलं कोटिगुणितं माणिकर्णिकमज्जनात् १

अन्यत्र व्रास्नसानां तु कोटिसंभोज्य यत्फलं तद्वाराणसी एकेन भोजिते लभ्यते

दृपपापादीनवत्सला: ॥ विप्रा ऊचुः ॥ धन्यासि त्वं विशालाक्षी पापेभ्यो नास्ति ते भयं ॥१२५॥

कृता प्रदक्षिणा काश्याः वैराग्यं च समागतं दत्तं त्वया धनं सर्वं निवृत्ता पापधीस्तथा

॥१२६॥ कृतार्थासि महाभागे कुरुक्षेत्रप्रदक्षिणां अस्माभिरेव सहिता ततः शुद्धिमवा

प्स्यसि ॥१२७॥ पुनः पापपरा माभूरित्यूचुस्ते तपोधनाः सापि श्रुत्वा वचस्तेषां मत्वा

न त्वा ततो द्विजान् ॥१२८॥ चक्रे राज्ञी प्रणयिनी विप्रोर्न्न्तेनमनुत्तं षष्ठे दिवसे स

र्वे यात्रिणो वृषभध्वजे ॥१२९॥ स्थिता सापि महाभागा निवृत्ता सर्वपापतः प्रातः

प्राप्ता क्षणेनैव वरुणासंगमं जना ॥१३०॥ तत्र स्नात्वा विधानेन नत्वा केशवमाद

रात् मुक्तिमंडपिकां प्राप्ताः सापि तैः सममेव हि तत्र पूजां च महतीं कृत्वा विश्वेश्वरस्य

चास्तिकाः पंचाविधानेन प्राजगाम निजालयं ॥१३२॥ मादृता सर्वजनैः सर्वैः पित्रा

Indira Gandhi National Centre for the Arts

चापिमहात्मना तथायमपिभोविप्र विप्रुद्घोमंडपोद्विजः इतिश्रुत्वावचस्तस्यभैर
वस्यमहात्मनः सर्वेविगतसंदेहाः वभूवुस्तेसभासदः ॥१३४॥ रविरुवाच सत्संगतः
क्षेत्रप्रदक्षिणांकृत्वा काशीकथाश्रवणंकीर्त्तनादि शुभप्रदंपापहरंसुवासदंकृत्वं
चमुद्गोमंडपःसप्तमेव ॥१३५॥ श्रीमहादेवउवाच सभासदैर्द्देवचरैरुक्तोकूष्मांड
मंडपो प्रदक्षिणीकृत्यनुतान्नमस्कृत्यपुनःपुनः ॥१३६॥ निष्पापोहर्षसंपन्नोय
पनुस्तोऽस्वमालयंइसेचत्तेसमाख्यातंपंचक्रोशप्रदक्षिणं ॥१३७॥ विधिकार्यां
महाभागेप्रायश्चित्तसमन्वितः तस्मादेविममक्षेत्रेप्राप्यंतेधर्मतत्पराः ॥१३८॥
तेकृतार्थानसंदेहोधर्मज्ञानेनमानवाः अस्यास्तिविपुलाभूमिर्यदिपापंहिवां
छति ॥१३९॥ कर्तुंमूढमतिःसोहियःकाश्यांपापमाचरेत् प्रायश्चित्तविधिःप्रोक्तो



मयालक्ष्मिगोरवात् ॥१४०॥ तस्मात्सर्वप्रयत्नतः कार्याक्षेत्रस्यचप्रदक्षिणांप्रतिसंव
त्सरंदेविवांछद्भिर्मुक्तिमुत्तमां ॥१४१॥ निष्पापोयोवसेत्काश्यांत्रिकालाशनकृन्न
रः अन्यत्रयोगयुक्तात्मातनोमत्क्षेत्रगोचरः ॥१४२॥ यद्दंष्ट्राणमादेविममक्षेत्र
स्यैवैभवंसोपित्तत्फलमाप्नोतिसत्यएवनसंशयः ॥१४३॥ प्रदक्षिणफलंवक्तुंपं
चक्रोशात्मकस्यच लिंगस्यमयाप्रोक्तंसुगोप्यंपुरुषार्थदं ॥१४४॥ श्रुत्वामाहात्म्य
मतुलंपंचक्रोशात्मकस्यच लिंगप्रदक्षिणाकार्यात्वयाशिष्येनचानघ ॥१४५॥ इ
तिश्रुत्वाप्रसन्नात्माजैगीषव्योमहामुनिः देवंप्रदक्षिणीकृत्यनमस्कृत्यपुनःपुनः
॥१४६॥ जगामपंचक्रोशस्ययात्रार्थंशिष्यसंयुतः पंचभिर्द्दिवसैःकृत्वायात्रामात्रागतो
मुनिः ॥१४७॥ उपविष्टोविधिःसम्यक्पात्रायाःपापनाशनः मयापुण्यकृतेचापिनि

Indira Gandhi National Centre for the Arts

पं.को. १५

विघ्नः फलदायकः ॥ ४५ ॥ मुनिरागत्य विश्वेशं भवान्या सहितं तदा । पूजयामास विधि
वद्भक्त्यावैः सुविस्तरैः ॥ ४६ ॥ शिष्यो गुरुप्रसादेन निष्पापः पुण्यवान्सुधीः । जातः स्कं
दप्रसादेन श्रुत्वा माहात्म्यमुत्तमं ॥ ५० ॥ श्रीमहादेव उवाच एतत्ते कथितं देवि का
श्यांपसातकद्वतं तस्य प्रनाशनं शुद्धं प्रायश्चित्तं सुदुर्लभं ॥ ५१ ॥ श्रुत्वाध्यायमिमं
पुण्यं सर्वपापप्रणाशनं । नरः शुद्धिमवाप्नोति काशीवासं च गर्भहृत् ॥ ५२ ॥ न तेषां
पुनरावृत्तिः कल्पकोटिशतैरपि ॥ इति श्रीब्रह्मवैवर्त्ते तृतीयविभागे काशीमाहा
त्म्ये प्रायश्चित्तनिर्णये मंडपाख्यानं नाम द्वितीयोध्यायः ॥ २ ॥ ऋषय ऊचुः सूत
सूत महाबुद्धे वद विद्याविशारद । यथा प्रदक्षिणा कार्या मनुजैर्विधिपूर्वकं ॥ १ ॥ राम: १५
स्थानं वासस्य वद नो भक्तं चीमस्यमेव च पूजां सी ॥ स्थितानां च देवानां नाम

...नाके दान

एव च ॥ २ ॥ यथा संपूर्णतामेति यात्रा क्षेत्रस्य सत्तम । सूत उवाच । एवमेव पुरा पृष्टो भगवान्
शिवया शिवः ॥ ३ ॥ तद्ब्रवीमि मुनिश्रेष्ठाः शृण्वं तु विधिमुत्तमं । श्रीदेव्युवाच । भगवन्दे
वदेवेश प्रदक्षिणविधिं वद ॥ ४ ॥ पंचक्रोशस्य येनाशु निष्पापः पुण्यवान् भवेत् । श्रीमहा
देव उवाच । आश्विनादिषु मासेषु त्रिषु पार्वति सर्वदा ॥ ५ ॥ प्रदक्षिणा प्रकर्त्तव्या क्षेत्रस्था स्था
पापकांक्षिभिः । माघादि चतुरो मासाः प्रोक्ता यात्राविधानेन माम् ॥ ६ ॥ पूर्वस्मिन्दिवसे ढुंढिं
पूजयित्वा हविष्यभुक् । प्रातरुत्तरवाहिन्यां स्नात्वा विश्वेशमर्चयेत् ॥ ७ ॥ पुनर्यात्रार्थम
पि च शिवयोः पूजनं भवेत् । मुक्तिमंडपिकायां च संविश्य वरवर्णिनी ॥ ८ ॥ प्रतिज्ञां महतीं
कृत्वा पूजनं तत्र तत्र हि । काश्यां प्रजातवा कायमनोजनितमुक्तये ॥ ९ ॥ स्नाता स्नात वि
मु... कृत्यं पातकेभ्यो हिताय च । पंचक्रोशात्मकं लिंगं ज्योतिरूपं सनातनं ॥ १० ॥ भवानी

Indira Gandhi National
Centre for the Arts

॥पं॰क्रो॰॥
॥१६॥

शंकराभ्यां चलक्ष्मीशविराजितं ढुंढिराजादिगणैः षट्पंचाशद्विराजितं ॥११॥ द्वादशादित्य
सहितं नसिंहैः केशवैर्युतं वृक्षरामत्रयं युक्तं कूर्ममत्स्यादिसंयुतं ॥१२॥ अवतारैरनेकै
श्च पूतं विष्णोः शिवस्य च गौर्यादिशक्तिभिर्जुष्टं क्षेत्रं कुर्यात्प्रदक्षिणं ॥१३॥ बद्धांजलिः
प्रार्थयित्वा महादेवं महेश्वरं पंचक्रोशस्य यात्रां वै करिष्ये विधिपूर्वकं ॥१४॥ प्रीत्यर्थं देवदे
वेशस्य सर्वाघौघप्रशांतये इति संकल्प्य मौनेन प्रणिपत्य पुनः पुनः ॥१५॥ ढुंढिराजगणे
शानं महाविघ्नौघनाशनं पंचक्रोशस्य यात्रार्थं देह्याज्ञां कृपया विभो ॥१६॥ विश्वेशं
त्रिःपरिक्रम्य दंडवत्प्रणिपत्य च मोदं प्रमोदं सुमुखं दुर्मुखं गणनायकं ॥१७॥ प्रणम्य
पूजयित्वा दंडपाणिं ततोर्चयेत् कालराजं च पुरतो विश्वेशस्य जगद्गुरोः ॥१८॥ पूज ॥रामः॥
यित्वा ततो गच्छेत् मणिकर्णीं विधानतः तत्र स्नात्वा महादेवं मणिकर्णीशमर्चयेत् ॥१९॥ १६

विनायकं सिद्धिदं च पुनरागत्य पूजयेत् मणिकर्णीतटे छत्रं गंगाकेशवमच्युतं ॥२०॥ ललि
तां च ततः पूज्य जरासंधेश्वरं विभुं सोमनाथं ततः पूज्य दालभ्येश्वरमेव च ॥२१॥ शूलटं
कं महादेवं वाराहं पूज्य तं व्रजेत् दशाश्वमेधलिंगं च वंदीं तत्रैव पूजयेत् ॥२२॥ सर्वेश्वरं
च केदारं ततो हनुमदीश्वरं संगमेशं ततः पूज्य लोलार्कं पूजयेत्ततः ॥२३॥ अर्के सं
गं गणाध्यक्षमसेत्तीरं पुनर्व्रजेत् क्षेत्रं प्रदक्षिणीकुर्वन् तिलमात्रं न संत्यजेत्
॥२४॥ दुर्गाकुंडे ततः स्नात्वा पूजयेद्दुर्गाविनायकं दुर्गां संपूज्य विधिवत्तत्र वसेत्तत्र सु
खं वा स्वपेत् ॥२५॥ ब्राह्मणान् भोजयेत्तत्र मधुपायसलड्डुकैः रात्रौ जागरणं तत्र पुराणश्रवणा
दिकं ॥२६॥ कुर्याच्च कीर्त्तनं भक्त्या परोपकरणादिभिः जय दुर्गे महादेवि जय काशिनिवा
सिनि ॥२७॥ क्षेत्रविघ्नहरे देवि पुनर्दर्शनमस्तु ते इति दुर्गां प्रार्थयित्वा विश्वक्सेनेश्वरं ततः

Indira Gandhi National
Centre for the Arts

श्रीपं·कौमे ॥१८॥

२८ पूजयित्वा कर्द्दमेशं पंचब्राह्मितिलैर्नमेत्॥ सारौकर्द्दमतीर्थे च स्नानं कूपावलोकनं
२९ सोमनाथं विरूपाक्षं नीलकंठमथार्चयेत्॥ तत्र वासं विधायाथो किंचिद्भूमं द्विजार्चनं
३० श्राद्धं दृष्टिकर्मकार्याणि त्वा मुच्येद्दृणत्रयात्॥ कर्द्दमेशमहादेव काशिवासिजनप्रियं
३१ त्वत्पूजनात्महारुद्र पुनर्दर्शनमोस्तु ते॥ प्रातः स्नात्वा कर्द्दमेशं पूजयित्वा च सद्द्विजान्
३२ नागनाथं च चामुंडां मोक्षेशं करुणेश्वरं वीरभद्रं ततो दुर्गां विकटाख्यां प्रपूजयेत्॥
३३ उन्मत्तभैरवं नीलं कालकूटं ततोर्चयेत् दुर्गां च विमलां नत्वा महादेवं ततोर्चयेत्
३४ नंदिकेशं भृंगिरिटिं तत्रैव चागणाप्रियं विरूपाक्षं यक्षेशं विमलेश्वरमेव च॥ ३५ सो
मं दृष्टानंदं चैवामृतेशं तत्र पूजयेत् गंधर्वसागरं तीर्त्वा भीमचंडिं ततो व्रजेत्॥ ३६ त ॥राम॥ ॥१८॥
त्र स्नात्वा भीमचंडीं पयसा स्ना पयेत्सुधीः पंचोपचारैः संपूज्य ब्राह्मणान्परितोष

येत्॥ ३७ तत्र वासं प्रयत्नेन कुर्याच्चंडविनायकं॥ रविरक्ताक्षं गंधर्वं नरकार्णवतारकं॥ ३८ एशि
वं प्रपूज्य यत्नेन […] रात्रौ पूर्ववदाचरेत् प्रातरुत्थाय सुस्नातः प्रार्थयेद्भीमचंडिकां॥ ३९
भीमचंडि प्रचंडानि मम विघ्नानि नाशय॥ नमस्तेस्तु गमिष्यामि पुनर्दर्शनमोस्तु ते॥
४० ततो गच्छेदेकपादं गणं नत्वाथ तंडुलान्॥ तिलांश्च विकिरेत्तत्र धनधान्यादिसंपदे
४१ ततो गच्छेन्महाभीमं भैरवं भैरविप्रभां॥ भूतनाथं च सोमेशं पूजयेत्सिंधुरोधसि॥ ४२
कालनाथं कपर्दीशं कामेशं चगणेश्वरं॥ वीरभद्रं चास्मुखं गणनाथं प्रपूजयेत्॥ ४३ ततो
गच्छेद्देहलीशं विघ्नपूगनिवारकं॥ मोदकैः पृथुकैर्लाजैः सक्तुमिश्रैस्तु पर्वभिः॥ ४४ […]
पूजयेत् […] ब्रूयाद्देवं तं देहलीविनायकं॥ त्वत्पार्श्वे षोडशापुनः विघ्ननाथान्समर्चयेत्॥ ४५ उ
द्दंडगणपं पूज्य उत्कलेश्वरमेव च रुद्राण्यस्तु तपोभूमिं दृष्ट्वा रामेश्वरं व्रजेत्॥ ४६ ब्राह्मणा

Indira Gandhi National Centre for the Arts

।पं॰को॰ ।१८॥

यं ततः स्नात्वा तर्पणादि विधाय च । रामेश्वरं श्वेततिलैर्विल्वपत्रादिभिर्यजेत् ॥ ४७ ॥ सोम
नाथं च तत्रैव पूजयेद्दक्षिणातः । भरतेशं लक्ष्मणेशं शत्रुघ्नेश्वरमेव च ॥ ४८ ॥ सीताम रामाम्
मीश्वरं तत्र पूजयेल्लहुषेश्वरं । तत्र वासं प्रकल्प्याथ पूर्ववज्जागरादिकं ॥ ४९ ॥ कृत्वा स्नात्वा
परमेशं प्रार्थयेत्काशिवासदं । श्रीरामेश्वर रामेण पूजितस्त्वं सनातन ॥ ५० ॥ आत्तां देहि मह तथ
देव पुनर्दर्शनमेव ते । लिंगानि सुबहून्या ऽदेवरूपाणि पारगान्यथ ॥ ५१ ॥ पूजयित्वा ततो
गच्छेद्देवसंघनिषेवितं । देवसंघेश्वरं किंचिद्दृष्ट्वा स्थित्वा ततो व्रजेत् ॥ ५२ ॥ पाशपाणिं गणे
शं च क्षेत्रमध्ये व्यवस्थितं । पूजयित्वा वहिः क्षेत्र पृथ्वीश्वरमथ व्रजेत् ॥ ५३ ॥ एकोऽश्वमे
धः पृथुना कृतः क्षेत्राद्वहिः पुरा स्वर्गभूमिस्ततः साक्षेया मोक्षभूमिस्तु मध्यतः ॥ ५५ ॥ का ॥राम॥
श्यां श्चतुर्दिशं देवि योजनं स्वर्गभूमिका । मतास्तत्र हि गच्छंति स्वर्गं भुक्तिनां परं ॥ ५६ ॥ १८

॥ ततः सुपूर्णं हि सरः स्पृष्ट्वा गच्छेत् शनैः शनैः । महाक्षेत्रं कापिलं तु यत्र श्रीवृषभध्वजः ॥
५७ ॥ तत्र स्नात्वा विधानेन तर्पयित्वा पितॄनथ । श्राद्धं विधाय सुश्रद्धः पूजयेत्तु वृषभध्वजं ॥
५८ ॥ निवसेत्तत्तु दिवसं श्रवणादि प्रकल्पयेत् । वृषभध्वज महादेव काशिवासिजनप्रिय ।
प्रपन्नं पाहि मां दीनं दर्शनं देहि मे पुनः । प्रदक्षिणीकृत्य सततो गच्छेज्ज्वालानृसिंहकं ॥ ६० ॥
एवं प्रदक्षिणीकृत्य सरः कापिलमुत्तमं । वरूणं च तत्र स्नात्वा स्नात्वा वै संगमे शुभे ॥ ६१ ॥ आ
दिकेशवमभ्यर्च्य संगमेश्वरमेव च । विनायकं खर्वसंज्ञं पूजयित्वा ततो व्रजेत् ॥ ६२ ॥ कोटी
कूस्मयवान् सुद्धान् विकिरन् विश्वमुच्चरन् । प्रल्हादेश्वरमभ्यर्च्य त्रिलोचनमतः परं ॥ ६३ ॥
२ पौ विंदुमाधवमभ्यर्च्य ह्रदे पंचनदे शुभे । गभस्तीशं मंगलां च गौरीं दृष्ट्वा ततो व्रजेत् ॥ ६४ ॥ व
सिष्ठवामदेवौ च पर्वतेश्वरमेव च महेश्वरं समभ्यर्च्य ततः सिद्धिविनायकं ॥ ६५ ॥ समाव

Indira Gandhi National
Centre for the Arts

पं॰क्रो॰ ॥१९॥ रणगणान्दिव्यान्पूजयेद्गणनायकान्मलिकरणंपांततःस्नात्वागच्छेद्विश्वेश्वरंमणि यमि
९४ नमस्तुभ्यंमहेशानंप्रविशेद्देवसन्निधौ।पंचोपचारैःसंपूज्यस्तुत्वानत्वापुनःपुनः
९५ मुक्तिमंडपमागम्यकृतार्थस्तत्रसंविशेत्।विघ्नंचदंडपाणिंचढुंढिंभैरवमेवहि।द्व
आदिसंपंचगणपान्पूजयेत्पुनरेवच प्रदक्षिणीकृतान्देवान्स्मरेत्तत्क्रमात्सुधीः
९६ जयविश्वेशविश्वात्मन् काशीनाथजगद्गुरो।त्वत्प्रसादान्महादेवकृताद्देवप्रद गप
क्षिणा ९० अनेकजन्मपापानिकृतानिममशंकर गतानिपंचक्रोशात्मलिंगस्य
कृपदक्षिणात्। ९१ त्वद्भक्तिःकाशिवासश्चरहितःपापकर्मणा।सत्संगश्रवणेद्ये
श्वकालेगाच्छतुनःसदा। ९२ [illegible] हरशंभोमहादेवसर्वज्ञसुखदा राम॰
यकःप्रायश्चित्तंसुनिर्वृत्तंपापानांत्वत्प्रसादतः। ९३ पुनःपापरतिर्मा [illegible] स्तुधर्मेव ॥१९॥

द्धिःसदास्तुमे।इतिजप्त्वाययाशक्त्यादद्यादानंद्विजन्मनां। ९४ ध्यावध्याकरपुगंमंत्रीमंत्रमे
तमुदीरयेत्।पंचक्रोशस्ययात्रेयंयथावद्यामयाकृता। ९५ न्यूनंसंपूर्णतांयातुत्वत्प्रसा
दान्मापते।इतिप्रार्थ्यमहादेवंगच्छेद्देहंस्वकंस्वकं। ९६ न्यूनातिरिक्तदोषाणांपरि
हारायदक्षिणां।संकल्प्यागत्यचगृहेब्राह्मणान्भोजयेत्ततः।ततआगत्यचगृहेकुटुं
बैःसहभोजनं। ९७ कृत्वात्मानंततोध्यायेत्कृतकृत्योभवेत्ततः।एकरात्रंतुमध्ये
यःप्रवसेच्छुचिमानसः। ९८ वरुणायास्तटेरम्येसयातिपरमांगतिं।द्विरात्रमथवसतिं
च्ष्मेतस यःकुर्याद्वैयतस्मरः। ९९ प्रथमंचंडिकाक्षेत्रेद्वितीयंवरुणातटे।यस्तुत्रिरात्रमुषितोम
ध्येभवतिपार्वति। १०० दुर्गास्थलेभीमचंडीरामेशोवासमच्छति।वसतिंयस्तुकुरुते
मध्येदिनचतुष्टकं। १०१ प्रथमांवसतिंकुर्यात्कर्दमेश्वरसन्निधौ।द्वितीयांभीमचं

तेपि

Indira Gandhi National Centre for the Arts

॥पं.क्रो.॥ ऽंतु रामेशेतु तृतीयकं ॥ ८२ ॥ चतुर्थी कापिलेतीर्थे वसतिं परिकल्पयेत् पंचरात्रिं तु वा
॥२०॥ सस्तु पूर्वमुक्तं च कल्पयेत् ॥ ८३ ॥ वसंति यस्तु कुरुते मध्ये दिवसषण्मितं दुर्गालये क
र्दमेशे भीमचंडांततःपरं ॥ ८४ ॥ देहलीशे च रामेशे कापिलेशे ततो वसेत् सप्तमे दि
वसे गच्छेत् श्रीविश्वेश्वरसंनिधौ ॥ ८५ ॥ बालवृद्धकुमाराणां यथेष्टं वासरुच्यते
यथाकथंचिद्देवेशि पंचक्रोशप्रदक्षिणां ॥ ८६ ॥ कुर्यादेवं न मासादि चिंतयेद्धर्मको
विदः स एव शुभदः कालो यस्मिं श्रद्धोदयो भवेत् ॥ ८७ ॥ श्रद्धा हि दुर्लभा लोके कलौ
खलु विशेषतः श्रद्धैवा तीर्थदेवश्च श्रद्धा स्वर्गापवर्गकौ ॥ ८८ ॥ श्रद्धया यत्कृतं सर्वं अ
नंतफलदं भवेत् सत्ये श्रद्धा गुणवती नास्ये सा फलप्रदा ॥ ८९ ॥ काश्यां निषति ॥एम.॥
यो नित्यं स्नाति भागीरथीजले कुर्यात्सांवत्सरीं यात्रां पंचक्रोशस्य सुंदरि ॥ ९० ॥ सव ॥२०॥

त्सरं ततो निवसेन्ममानुग्रहतः सुखी ॥ इति श्री ब्रह्मवैवर्ते त्रितीयविभागे काशीमाहा
त्म्ये पंचक्रोशयात्रायां तृतीयोऽध्यायः ॥ ३ ॥ श्रीपार्वत्युवाच ॥ क्षेत्रप्रदक्षिणे देव नियमाः
के भवंति तान् ॥ वद त्व(ना)रिताशेषविश्वनाथ कृपानिधे ॥ १ ॥ श्रीमहादेव उवाच ॥ प्रतिग्र
हं परान्नं च परदाराभिभाषणं ॥ परस्वग्रहणं स्नेहादसद्वार्तां च वर्जयेत् ॥ २ ॥ असतां पापिनां
संगं न कुर्यात्सुयतो नरः ॥ असत्समागमात्सर्वं निष्फलं जायते नृणां ॥ ३ ॥ मम द्रोहपरैः सा
कं न व्रजेद्विष्णुनिंदकैः ॥ परापवादं नो कुर्यात्परद्रोहं विवर्जयेत् ॥ ४ ॥ गुरुनिंदां शास्त्रनिंदां शि
वधर्मस्य महात्मनां ॥ तीर्थलिंगतपोनिंदां न कुर्यात्तु प्रदक्षिणे ॥ ५ ॥ अन्यत्र तु कृतं पापं नश्यत
क्षेत्रप्रदक्षिणात् ॥ क्षेत्रप्रदक्षिणामध्ये कृतं केन प्रणश्यते ॥ ६ ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शू
द्रैश्चैवांत्यजातिभिः ॥ कांक्षिभिः परमं तत्त्वं कर्तव्यं क्षेत्रप्रदक्षिणं ॥ ७ ॥ किंचिद्दानं प्रसहं

Indira Gandhi National
Centre for the Arts

मायान्तं च मस्तु एं ... वणकान को द्वयोस्त पा
ताकृतं मे पुनं चैव भोगानन्यां ... वनजो ये ॥१॥२

ना

॥पं॰को॰॥ ब्राह्मणेभ्यो दिवंदी नो स्पर्गंध केषु भूमौ शय्या तैलमांसादि दुष्टं सर्वं वर्ज्यं क्षेत्रयात्रा
॥२७॥ दिनेषु ॥ स्नानं दानं प्रकुर्वीत निस्यश्राद्धं च संदृश्य यत्र किंचित्क्रियते कोटिकोटिगुणं
भवेत् ॥९॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थो यमस्करी क्षेत्रे वसन्वहिर्वापि कुर्याद्दे व
प्रदक्षिणां ॥१०॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं न चापरं ॥ वहिं कृतानां पापानां मध्ये वा
पि सुरेश्वरि ॥११॥ प्रायश्चित्तांतरं पुंसो न दृष्टं न मया श्रुतं ॥ वसंति देवा बहवः स्वर्गभूमौ
वहिः सदा ॥१२॥ मदाज्ञां पालयंत्येव वासार्थं दिग्पमर्णाता ॥ वहिः स्थिताः प्रकुर्वीत द
क्षिणां क्षेत्रलब्धये ॥१३॥ ममानुग्रहमासाद्य प्रविशंति हि काशिकां ॥ मदनुग्रहकामै
श्च पंचक्रोशात्मकं प्रिये ॥१४॥ लिंगप्रदक्षिणी कृत्य रुद्रयोहं कृपानिधिः ॥ अस्मिन् राम॰
क्षेत्रे महादेवि पुण्यं पुण्येतरं तु वा ॥१५॥ अनंतकोटिगुणितं भवेत्सर्वं न संशयः ॥ अ ॥२७॥

त्रगेहे कृतं पापं केवलं यातनावहं ॥१६॥ अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति ॥ पुण्यक्षेत्रे कृ
तं पापं गंगातीरे विनश्यति ॥१७॥ गंगातीरे कृतं पापं वाराणस्यां विनश्यति ॥ वाराणस्यां
कृतं पापमंतर्गेहे विनश्यति ॥१८॥ अंतर्गेहे कृतं पापं वज्रलेपो भविष्यति वज्रलेपं
छिद्यते न संचक्रोशप्रदक्षिणां ॥१९॥ तस्मात्सर्वप्रयत्नेन कुर्यात्क्षेत्रप्रदक्षिणां ॥ वा
राणसीं तु संप्राप्य प्रमादाद्यो वहिर्गतः ॥२०॥ देवास्य पुनरागमः दक्षिणेन प्रशुध्यति
अविमुक्तं महाक्षेत्रं सर्वदं जननी यथा ॥२१॥ पुत्रस्य जननी लोके सर्वथा हितकारि
णी ॥ हितकृत्सर्वजंतूनां काशी हामुत्र सर्वदा ॥२२॥ श्रीदेव्युवाच ॥ भगवन्सर्वभूते
श कृपापूरितविग्रह कृतार्थानां वद विभो क्षेत्रसंन्यासिनामपि ॥२३॥ प्रदक्षिणाक्रमं
क्षेत्राद्वहिर्वा मध्यतोपि वा नियमस्य न भंगः स्याद्यथा पापं च नश्यति ॥२४॥ देहिनां पा

Indira Gandhi National
Centre for the Arts

॥पं॰ क्रो॥
॥२२॥

पसंबंधः सर्वथा ज्ञायते क्रमात् तत्काशिवासजं नश्येत् क्षेत्रसंन्यासिनां पया ॥२५॥ श्री
महादेव उवाच ॥ सम्यक्पृष्टं त्वया देवि महाहंकारनाशनं प्रायश्चित्तं [illegible]न्यासिनां हि
क्षेत्रा दोषविनाशनं ॥२६॥ विधिस्तु पूर्वमेवोक्तो नियमादिषु तत्त्वतः ॥ प्रदक्षिणाक्रम
स्तेषां मवधारय सुव्रते स्नात्वादेवं समभ्यर्च्य विश्वेशं विश्वपासहा [illegible] मोदादि पंच
कं ढुंढिं दंडपाणिं च भैरवं ॥ पूर्ववत्तारणाम्नज्य दुर्गां पूज्यं च यत्नतः ॥२७॥ बहिरावरणं
सत्कागणेशानां तु सप्तकं ॥ मध्ये प्रदक्षिणं कुर्यात् द्वा आवरणयोः कृती ॥२८॥ संमुखी
पूजयेच्चाम्नतस्थिता: भूय विधिवत् पूज्यायेवामतः स्थितो देवादेयश्च फलदाः क्षेत्रपालाः प्रयत्नतः
३०॥ एकरात्रं द्विरात्रं वा वसेन्मध्ये त्रिरात्रकं ॥ यत्र श्रद्धा सुमहती वसेत्तत्र न संशयः ॥एम॰॥
३१॥ प्रसहं दंडपाणेस्तु पूजा कार्या प्रयत्नतः दंडपाणेः पूजनाद्धि सिद्धिर्भवति नान्य ॥२२॥

था ॥३२॥ दंडपाणे यक्षपते क्षेत्रसंन्यासिवल्लभ त्वेच क्रोशस्यथात्रे यं सिद्धमेतत्त्वत्प्रसादतः ॥३३॥ म
नेनश्लोकमंत्रेण प्रार्थनं पूजनं स्मृतं प्रत्यहं कुर्वतां यात्रा संपूर्णा भवति ध्रुवम् ॥३४॥ प्रागस
विश्वनाथस्य पूजा कार्या तु पूर्ववत् श्रीदेव्युवाच ॥ प्रत्यहं दंडपाणेस्तु पूजा प्रोक्ता विशेषतः
३५ किमेतद्धृद्देवेशयात्रामुद्दिश्य शंकर श्रीभगवानुवाच ॥ काशीं प्राप्य बहिर्नैव गच्छेत्स
र्वात्मना क्वचित् ॥३६॥ मन्मुखात्सम्प्रगाप्यस्य क्षेत्रसंन्यासकृत्तमः दंडपाणिः समभवत्त
दारम्य वरानने ॥३७॥ पुनः कालांतरे देवि ऋषिभिर्नारदादिभिः प्रष्टोहं क्षेत्रजनितपा
पनाशनमद्भुतं ॥३८॥ तदा सुदुर्लभं देवि प्रायश्चित्तं [illegible] मया महत् ॥ उपदिष्टं महालिंगप्र
दक्षिणमशेषतः ॥३९॥ तत्कृत्वा पश्चात् दंडपाणिर्दुर्मपरायणः ॥ तदा मयोपदिष्टोसौ
महापाशुपतः कृती ॥४०॥ क्षेत्रयात्रा द्वितीये यं मयोक्ता दंडपाणये ॥ अतो दंडपतेः पूजा
नि:

Indira Gandhi National
Centre for the Arts

पं·को·॥ ॥२३॥ कर्त्तव्यार्थ्वर्त्तिकारिणी॥४१॥पंचकोशात्मकस्यैवलिंगास्यपरमात्मनः प्रदक्षिणात्रयंकृत्वाजी
वन्मुक्तोभवेन्नरः॥४२॥श्रीदेव्युवाच॥ज्ञात्वापिप्रकृयादेवनकुर्वंतिप्रदक्षिणं तत्केनहे
तुनामर्त्त्याउपेक्षंतेमहाफलं॥४३॥श्रीभगवानुवाच॥अदृष्टाः पुण्यैर्नोदेविनपांशुसादि व ३
भिःसदा॥तस्माद्दुर्मेधप्रपत्ततांसिध्येत्सर्वेनचाप्यतः॥४४॥यत्रयत्रपरिरज्यतेमनस्तत्र
तत्रसुखमेधतेपुनः॥साधनानिविविधानितत्सरोपेनतत्फलमवाप्नुयान्नरः॥४५॥लौ
किकेपरमवैदिकेथवापामरःपरतत्त्वचिंतया॥मोहकःपरममोहकोयथादीयतेक
पटभार्ययातथा॥४६॥मोहितोनहिविचारयत्ययंजीवनंमरणमप्यहोवशी॥एकमे
कंकालकूटमिद्रियंनाशयेत्सुनैःतदेवशोधितं॥४७॥यद्बुद्धिषमप्यमृतंभवेत्॥ज ॥राम॥ ॥२३॥
गत्त्रणीकृत्यसकालम्यसंख्यामानमायोऽप्यशिवेनयोगैः॥४८॥अविघ्नमेवंस्वमलंवि

१०
मज्यशरीरसंस्थंमलखंडभांडं॥मुक्तोभवेदेषनचान्यथैवमूर्त्तैःप्रसादाद्धृदयेस्थितेविमुक्तः॥४९॥
कःकर्तुमेवंप्रभवत्संविधानंकलौमनुष्यावहुदोषयुक्ताः॥अथापिमुक्तोभवितायदित्वां
भजस्व मोहेणसकलैश्वभावैः॥५०॥पूर्वोदिताद्यप्यतिदर्शकोयंविमोहनार्थेर खिलैश्च
५२ शास्त्रैः॥वीभत्सितेदुर्विषयेकदाचिद्यावानुरागोभवितानरस्य॥५१॥सत्येनदविष्यासर
मात्मनीशेकोनाममुक्तोनभवेन्द्रवाध्वेः॥५२॥अविमुक्तंममक्षेत्रमविमुक्तंसदाशिवं
अविमुक्तेजनंशांतंसेवंतेयेधृतव्रताः॥५३॥विमुक्तापरमानंदंयस्थिस्थितिमुपागताः
अनेकजन्मसुमहत्तशाधनैर्ज्ञानमुत्तमं॥५४॥प्राप्नुवंतितदेकेनजन्मनासाधुवा
सिनः॥अष्टांगादिभिरत्यैश्चतपोयज्ञादिभिःसदा॥५५॥साधितैःप्राप्तिकासिद्धिरविमु
क्तेनिर्गलात्अविमुक्तासरोयोगोज्ञानंदानंजपस्तपः॥५६॥क्षेत्रतीर्थादिनियमान
२

Indira Gandhi National
Centre for the Arts

॥पं·क्षे· २४

४५१ महीधर सं.

त्रिपे

संतिशुभदर्शिनां अविमुक्तंसमासाद्यनसजेन्मोक्षकामुकः ॥५७॥ क्षेत्रन्यासदृढं कृत्वा क्षेत्रधर्मपरः सदा क्षेत्रन्यासपराणां त्वमहमप्यनुकालजैः ॥५८॥ भोगैः सह यतो याति तोऽशिवः परमां गतिं यथा पतिव्रता नारी भर्त्तारमनुगच्छति ॥५९॥ तथा साहसमालंब्य काशीमनुगतो भवेत् गुरुद्रोहपरो यस्तु विप्रद्रोहपरस्तथा ॥६०॥ न तस्य काशीसिध्येन बहुभिः साधनैर्युता क्षेत्रसंन्यासिनामेवं क्रमः प्रोक्तो मयानघ ॥६१॥ प्रदक्षिणायास्तु महान् महापापहरः परः ॥ इति श्री ब्रह्मवैवर्त्ते सत्तीय विभागे क्षेत्रप्रदक्षिणा वर्णनं नाम चतुर्थोध्यायः संवत् १८९२ पोसे मासे शुक्लेपक्षे तिथौ त्रयोदश्यां गुरुवासरायां वासुदेव पठनार्थे इदं पुस्तकं शुभं

जैमिनिव्यासमुनये भवानि कथितं ॥ प्रमक्षायनदातव्यं भक्त श्रोसापयप्रिये ॥६२॥ सारात्सारतरं सारं पापघ्नं सर्वकाम फलं दं ॥ माहात्म्य श्रवणादेव मुक्तो भवति निश्चितं ॥६३॥ ६:०:

॥राम॥ २४॥

Indira Gandhi National Centre for the Arts